साहित्य तृतीय-पत्रम्

उपशास्त्री-I खण्ड किरातार्जुनीय - प्रथमः सर्गः

Date ___/___/___

प्र०(1)- स किंसखा साधु न शास्ति योऽधिपं
हितान्न यः संशृणुते स किंप्रभुः ।
सदाऽनुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसम्पदः

उत्तरम्-प्रसंगः- प्रस्तुत पद्यांशः महाकवि भारविविरचितकिरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति ।

श्लोकेऽस्मिन् वनेचरः युधिष्ठिरं प्रति कथयति-यत् यः मंत्री सखा सेवकः वा स्वामिनः हितं नोपदिशति स दुर्मन्त्री कुसखा कुसेवको वाऽस्ति । यस्य हितोपदेष्टुः साधु वचनं न संशृणुतं सोऽपि कुराजैव । एवं यत्र राजानोऽमात्यादयश्च परस्पर-मनुरक्ताः स्युस्तत्रैव सर्वा अपि राज्य सम्पदः स्थिरीभवन्ति ।

व्याख्या:- यः सखा=अमात्यादिः, अधिपं=स्वामिनं । साधु = हितं, न शास्ति = नोपदिशति, सः हितानुपदेष्टा कुत्सितः सखा, किंसखा= दुर्मन्त्रीत्यर्थः यः-प्रभुः हितात् = आप्तजनाद्धितोपदेष्टुः सकाशात् । न संशृणुते = न शृणोति । सः=हिताश्रोता प्रभुः, किम्प्रभुः=कुत्सित-स्वामी, हि= यस्मात्, नृपेषु = राजासु, अनुकूलेषु परस्परानुरक्तेषु सत्सु, सर्वसम्पदः = विविधैश्वर्याणि, सदा रतिम् = अनुरागम्, कुर्वते= कुर्वन्ति ।

Renu Devi
03/10/20

राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

Page No.

शास्त्री - II खण्ड साहित्य

रघुवंशस्य त्रयोदश - चतुर्दश - सर्गयो

Date ___/___/___

प्र० (1) - किं कृत्वा श्रीरामः स्वपितुः पूजागृहं प्रविवेश ?

उत्तरम् - विभीषणसुग्रीवादिकं सुन्दरेषु भवनेषु आवस्य।

प्र० (2) - पितुः पूजागृहे उपविष्टां लज्जितां कैकेयीं किमाह श्रीरामः ?

उत्तरम् - अम्ब! मम पिता स्वर्गफलात् सत्यात् न अभ्रस्यत यत् तत् चिन्त्यमानं तव सुकृतम्।

प्र० (3) - श्रीरामः समाजनाय समागतान् ऋषीन् किं चकार श्रीरामः ?

उत्तरम् - समाजनाय समागतानां अगस्त्यादिकानां ऋषीणां सत्कारं कृत्वा श्रीरामः तेषां मुखेभ्यः रावणस्य जन्मादिविषयकं वृत्तान्तं शुश्राव।

प्र० (4) - वानराः राक्षसाश्च कति दिनानि अयोध्यायां आतिथ्यहितवन्तः सानन्दानि ?

उत्तरम् - पञ्चदशादिनानि।

प्र० (5) - श्रीरामः पुष्पकविमानं कदा कुबेरस्य सविधे प्रेषितवान् ?

उत्तरम् - वानराणां राक्षसानां च विश्राणनानंतरम्।

प्र० (6) - सीतां गर्भिणीं ज्ञात्वा श्रीरामः तां किं पप्रच्छ ?

उत्तरम् - दोहदाभिलाषं प्रपच्छ।

प्र० (7) - श्रीरामेण पृष्टा गर्भिणी सीता किमभिलषितवती ?

उत्तरम् - सीता प्राह -

सा दष्टनीवारबलीनि हिंस्रैः सम्बद्धवैरवनसकन्यकानि।
इयेष भूयः कुशवन्ति गन्तुं भागीरथीतीरतपोवनानि ॥

Renu Devi
03/10/20

राधा उमाकान्त सं० महावि० सुरखसेना,
पूर्णिया।

Page No.

शास्त्री - I खण्ड साहित्य
अभिज्ञानशाकुन्तलम्

Date __/__/__

प्र०(1) - अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम् ।
प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति ।।

उत्तरम् - प्रसंगः- प्रस्तुत पद्यांशः महाकवि कालिदासविरचितअभिज्ञानशाकुन्तलम नाट्यशास्त्रस्य सप्तमोऽङ्कात् उद्धृतोऽस्ति श्लोकेऽस्मिन् तथाविधं बालकं विलोक्य नृपतिर्दुष्यन्तः सकौतुकमाश्चर्यं सहितं च वचोऽवोचत् —

व्याख्याः- प्रक्रीडितुं = क्रीडां कर्तुं, मनोविनोदार्थम्, आमर्दक्लिष्टकेसरम् - आमर्देन = स्वकृताकर्षणवेगेन, मातुर्जिह्वया लेहनेन वा क्लिष्टाः = विकीर्णा केशराः = गलबालाः सटाः यस्य सः तं आमर्दक्लिष्टकेसरम् अर्धपीतस्तनं = अर्धं = असमग्रं अपूर्णं यथा स्यात्तथा पीतः = पानं कृतं स्तनौ येन सः तम अर्द्धपीतस्तनम्, किञ्चिदपीतस्तन्यम् सिंहशिशुं = केसरकिशोरम् बलात्कारेण प्रसह्य मातुः = जनन्याः सिंह्या सकाशात् सिंहीकोपमगणयित्वा कर्षति = अपनयति ।

अयं भावः - तथाविधं शिशुमवलोक्य सकौतुकं राजर्षिर्दुष्यन्तः स्वमनसि विचारयति - कोऽयमबालसत्वो बालः, यः किल क्रीडया मनोविनोदमात्रमेव कर्तुं सिंहीस्तनं पिबन्तं केसरकिशोरकं बलात्कारेण कर्षति ।

अत्रादात: स्वाभावोक्तिश्चालंकारो अनुष्टुप् छन्दश्च ।

Renu Devi
03/10/20

राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

Page No. ____

उपशास्त्री-II खण्ड साहित्य - तृतीय - पत्रम्
किरातार्जुनीय - प्रथमः सर्गः

प्र०(1) - महाकवेः भारवेः स्थितिकालः विलिखत ?
उत्तरम् - महाकवेः भारवेः जीवनवृत्तः स्थितिकालः अन्वेषकेभ्यः अधुना अपि अन्वेषणस्य विषयः अस्ति। प्रायः इतिहासकारः अस्य स्थितिकालः 550 ईस्वयाः परिपार्श्वे मानन्ति। यथा-
(1) - सप्तम् शताब्द्याः मध्यभागे लिखित वामनस्य जयादित्यस्य च काशिकायाँ भारवेः रचनायाः उद्धरणं मिलति।
(2) - एहोलस्य शिलालेखे पः 695 ईस्व्यां उत्कीर्णः अभवत् महाकवि कालिदासेन सह यशस्वी कवेः रूपे अमन्यत।
(3) दक्षिणभारते उपलब्धः 'अवन्ति सुन्दरी कथा' नाम्नः ग्रंथेन परिलक्ष्यते यत् महाराष्ट्रनरेशः विष्णुवर्धनः कर्णाटकस्य नृपः दुर्विनीतः तथा च काशी नरेशः सिंह विष्णुः महाकवि भारवेः उपजीव्याः आसन्। तेषाम् स्थितिकाल - 600 ईस्व्याः परिपार्श्वेः आसीत्। उपर्युक्त प्रमाणेन महाकवि भारवेः स्थितिकालः 550 ई० 600 ईस्व्याः मध्ये समीचीनः अस्ति।

कलकत्तायाः प्रकाशिते विश्वकोषे भारविं चतुर्थशताब्द्याः कविः अलिखत्। कियत् मनीषी कालिदासस्य समकालीनः अपि मानन्ति तथाच अस्मिन् राजशेखरस्य प्रमाणः ददाति यथा उज्जयिन्याम् काव्यकाराणां परीक्षा अभवत्। तत्र विक्रमादित्यस्य सभापतित्वे कालिदासः श्रेष्ठः रूपसूरः तथा च भारवेः परीक्षा अभवतः। परं च द्वयोः मतयोः पुष्टः प्रमाणः न मिलति।

Renu Devi
03/10/20
राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया।

Page No.